कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/



3457

तु

॥ श्रीगणेशाय नमः ॥ नमः श्रीशंकरानंदगुरुपादांबुजन्मने ॥ सविला
समाहामोहग्राहग्रासैककर्मणे ॥ १ ॥ वस्तुनिर्देशात्मकं नमस्कारा
त्मकं आशीर्वादात्मकं ॥ अनुबंधचतुष्टयं ॥ अधिकारी । संबंध ।
विषय । प्रयोजनं ॥ १ ॥ तत्र साधनचतुष्टयसंपन्नः अधिका
री ॥ नित्यानित्यवस्तुविवेकः । इहामुत्रफलभोगविरागः । श
मदमादिसंपन्नः । मुमुक्षुत्वं ॥ ४ ॥ शमदमउपरतितितिक्षा
समाधानश्रध्या ॥ ६ ॥ नत्वा श्रीभारतीतीर्थविद्यारण्यमु

Acc. No. ~~3457~~ M-1599

Title - पञ्चदशीसटीक.
टी. :- तत्त्वविवेकदीपिका

Author - विद्यारण्य / टी. रामकृष्ण.

Date - ?

Subject - तत्त्वज्ञान, वेदान्त.

Folio - 48.

Xerox - 96

Checked 2012

KKSU LIBRARY
RAMTEK
441 106
M-1599
Dist. Nagpur

1

मूसी च्छवी सर्वत्र प्रचारः

नीश्वरो।।प्रत्यक्तत्त्वविवेकस्य क्रियते पददीपिका।।१।।
पारिशितस्य ग्रंथस्याविघ्नेन परिसमाप्तिप्रचयगम
नाभ्यां शिष्टाचाँपरिप्राप्तामिष्टदेवतागुतनमस्कारल
२ क्षणं मंगलाचरणं स्वेनानुष्ठितं शिष्यशिक्षार्थं श्लोकेनो
पनिबध्नाति।।अर्थाद्विषयप्रयोजने च सूचयति।।नम
इति।।शं सुखं करोतीति शंकरः [illegible] कलजगदानंदकरः
स

परमात्मा एष ह्येवानंदयतीतिश्रुतेः आनंदः निरतिशयप्रेमास्पदत्वेन परमानंदरूपः प्रत्यगात्मा शंकरश्चासावानंदश्चेति शंकरानंदः प्रत्यगभिन्नः परमात्मा स एव गुरुः पाशपंकमलोपेतानुत्सादनहेतुनाक्तिपातेन योजयति परे तत्वे स दीक्षयाचार्यमूर्तिस्थ इत्यागमात् श्रीमांश्चासौ शंकरानंदगुरुश्चेति गंधदीप इत्यादि

स्वशिष्यानू परे तत्वे योजयति। प्रतिबंधरूपापोत्सादनहेतुनाक्तिपातेन॥

प०　　　　　　　　　　　　　　　　　　　　　　　　　　　　　　　　दश॥

कर्मधारयः॥

वत्समासः अनेन श्रीगुरोरणिमाद्यैश्वर्यसंपन्नत्वं सू-
चितं ॥ यद्वा श्रिया भूत्या सां करोतीति तिन्नांकरः ॥ रातेर्दातुः
परायणमिति श्रुतेः ॥ अनेन श्रीगुरोर्भक्तेष्टसंपादने
सामर्थ्यं सूचितं भवति ॥ अस्य गुरोः पादावेवांबुजन्म
कमलं तस्मै नमः प्रह्वीभावोस्तु ॥ किं विधाय ॥ सवि-
लासमाहामोहग्राहग्रासैककर्मणे ॥ विलासः कार्यव

२　　　　　　　　　　　　　　　　　　　　　　　　　　　　　　　　२

4

।ज्ञानंद्विविधं। मूलाज्ञानं १ कंमहत्। तूलाज्ञानं बहुकं

गः तेन सहवर्तत इति सविलासः एवंविधो माहामोहो मू
लाज्ञानं स एव ग्राहः मकरादिवऽस्वचरांग्राहस्यातीवदुःख
हेतुत्वात्तस्य ग्रासो ग्रसनं निवर्तनं स एवैकं मुख्यं कर्मव्या
व्यापारो यस्य तत्तथा तस्मादित्यर्थः॥ अत्र च शंकरानंदप
दद्वयसामानाधिकरण्येन जीवब्रह्मणोरैक्यलक्षणो वि
षयः सूचितः जीवस्य भूमब्रह्मरूपतयाऽपरिछिन्नसुखा
विर्भावलक्षणं प्रयोजनं च सूचितं॥ सविलासेत्यादिना
निःशेषानर्थनिवृत्तिलक्षणं प्रयोजनं मुख्यमेवाभिहितं॥१॥
त

इदानीमवांतरप्रयोजनकथनपुरःसरं ग्रंथारंभं प्रतिजानि
ते॥१॥ तस्मादंबुरुहद्वंद्वसेवानिर्मलचेतसां॥ सुखबो
धाय तत्वस्य विवेकोयं विधीयते॥२॥ तत्पादेति॥ तस्य
गुरोः पादावेवांबुरुहे कमले तयोर्द्वंद्वं तस्य सेवया परि
चर्यया स्तुतिनमस्कारादिलक्षणया निर्मलं रागादिर
हितं चेतोंतःकरणं येषां ते तथोक्तास्तेषां सुखबोधाया
नायासेन तत्वज्ञानोत्पादनाय वक्ष्यमाणप्रकार
स्य तत्वस्यानारोपितस्वरूपस्य अखंडं सच्चिदानंद ३

माहावाक्येन लक्ष्यत इति ॥ अयं वक्ष्यमाणो योऽस्य वि
वेकः आरोपितात्पंचकोशादिलक्षणाज्जगतः विवेचनं
विधीयते क्रियत इत्यर्थः ॥२॥ जीवब्रह्मणोरेकत्वलक्ष
णविषयसंभावनाय जीवस्य सत्यज्ञानादिरूपतां द
र्शयितुं शब्दादौ ज्ञानस्याभेदप्रतिपादनेन नित्यत्वं सा
धयति ॥ शब्दस्पर्शाइत्यादिना । तत्र तावद्विस्पष्टव्य. वहा
रवति जागरे ज्ञानस्याभेदं साधयति ॥२॥ शब्दस्पर्शादि
यो वेद्या वैचित्र्याज्जागरे पृथक् ॥ ततो विभक्ता तत्संविदे

दय

10

४ कल्प्यान्न भिद्यते ॥३॥ नाद्वैति ॥ जागरे इंद्रियैरर्थोपल २॥
ब्धिर्जागरितमित्युक्तलक्षणेऽवस्थाविशेषे वेद्याः संवि
द्विषयभूताः शब्दस्पर्शादय आकाशादिगुणत्वेन प्र
सिद्धास्तदाधारत्वेन प्रसिद्धा आकाशादयश्च वैवि
ध्याऽपरस्परगवाश्वादिवद्वैलक्षण्योपेतत्वोऽपृथक्
परस्परं भिद्यंते ॥ ततस्तेभ्यो विभक्ता बुध्या विवेचि
ताऽतऽसंवित्तेर्घटादीनां संवि[illegible]ज्ञानमेकरूप्या
संविऽसंविदित्यैकारेण विभासमानत्वाद्गगनमिव

भि
न [illegible]द्यते॥ अत्रायं प्रयोगः विवादाध्यासिता संविद्स्वा
भाविकभेदशून्या उपाधिपरामर्शमंतरेणाविभाव्य
मानभेदत्वाद्गगनवत्तत्राद्वसंवित्स्वगतसंविदो न भि
द्यते॥ संविद्वास्पर्शी संविद्वदिति॥ एकस्या एव संवि
दो गगनस्येवौपाधिकभेदेनापि भिन्नव्यवहारो
पपत्तौ वास्तवभेदकल्पनायां गौरवं बाधकमुन्नेयं॥३॥
उक्तन्यायं स्वप्नेऽप्यतिदिशति॥२॥

तथास्वप्नेत्रवेद्यंतुनस्थिरंजागरेस्थिरं।।तद्भेदेतस्तयो
संविदेकरूपानभिद्यते।।२।।तथेति।।यथाजागरणे
वैचित्र्याद्विषयाणांभेदःएकरूपाऽसंविदोऽभेदश्च
तथात्तेनैवप्रकारेणस्व[illegible]प्नेकरणेषूपसंहृतेषुजा
गरितसंस्कारजःप्रऽत्ययःसविषयःस्वप्नेइऽत्युक्तेलक्ष
णायांस्वप्नावस्थायामपिविषयाएवभिन्नाःनसं
विदिति।।ननुयदिस्वप्नजागरयोरेकाकारत्ताविषय

तत्संविदोर्भेदाभेदाभ्यां तत्स्वप्नजागर इति भेदव्यव
हारः किंनिमित्तक इत्याशंक्याह ॥ अत्र वेद्यं द्विति । अत्र
स्वप्ने वेद्यं परिदृश्यमानं वस्तुजातं न स्थिरं न स्थायि
प्रतीतिमात्रशरीरत्वात् जागरे तु परिदृश्यमानं वस्तु
जातं स्थिरं स्थायि कालांतरेपि द्रष्टुं योग्यत्वादतः स्थि
रास्थिरविषयत्वलक्षणवैलक्षण्यात्तद्भेदस्तयोः स्व
प्नजागरयोर्भेद इत्यर्थः ॥ ननु स्वप्नजागरयोर्भेद



वै ८०

८ श्चेतऽसंविदोऽपि भेदः स्यादिऽयानांक्याह ॥ तयोरिति ॥
एकरूपेति हेतुगर्भं विशेषणं ॥४॥ एवंअवस्थाद्वये क्षा
नस्यैकत्वं प्रसाध्य सुषुप्तिकालीनस्यापि तस्य तेनैक्य
सा त्रधानाय तत्र तावत्क्षानं साधयति ॥४॥ सुप्तो
क्षि तस्यैसौषुप्ततमोबोधोभवेऽस्मृतिः ॥ साचावबुध्ध
विषयावबुध्धं तत्तदातमः ॥५॥ सुप्तेति ॥ सुप्तः
उत्थितः सुप्तोत्थितः सुप्तंसुषुप्तिः तस्मादुऽथितस्तत्तवा ॥

८



अनुभवो द्विविधः एकः प्रत्यक्षात्मकः १ एकः अनुमित्यात्मकश्च ।। ८

तस्यसोषुप्ततमोबोधः सुषुप्तिकालीनस्य तमसोऽज्ञानस्य योबोधोऽज्ञानम
स्तिन किंचिदवेदिषमिति सा स्मृतिरेव भवेन्नानुभवस्तत्कालीनस्येंद्रि
यार्थसंनिकर्षव्याप्तिलिंगादेरभावादिति भावः ततः किं तत्राह ।।
साचेति ।। साच स्मृतिरवबुध्यविषयाऽवबुध्धोऽनुभूतो विषयो
यस्याः सा तथोक्ता या स्मृतिः साऽनुभवपूर्विकेति व्याप्तिर्लौकिकैर्दृ
ष्टेति भावः ततोऽपि किं तत्राह ।। अवबुध्यमिति ।। ततस्तस्मात्का
रणाच्च ऽसौषुप्तं तमस्तदा सुप्तोऽवबुध्यमनुभूतमित्यवगं

२ अनुभवमंतरास्मृतिर्नजायते ।। इति व्याप्तिः ।।

या या स्मृतिः सा साऽनुभवपूर्विका ।।

विषास्यदं

तव्यं॥ अत्रायं प्रयोगः विमतं न वे किंचिद्वेदिषमिति ज्ञानं अ
नुभवपूर्वकं भवितुमर्हति स्मृतित्वात् सा मे मातेति स्मृतिवदिति॥
५॥ तस्यानुभवस्य स्वविषयादज्ञाद्भिन्नं बोधांतरादभेदं चा
ह॥५॥ स बोधो विषयाद्भिन्नो न बोधात्स्वग[illegible] बोधवत्॥
एवं स्यात्त्रयेप्येका संवित्तद्वद्दिनांतरे॥६॥ स बोध[illegible]इ
तिह्रस्यां॥ स बोधः सोऽनुभूताज्ञानानुभवः ~~दज्ञानाद्भि~~
विषयादज्ञानाद्भिन्नः पृथक् भवितुमर्हति बोधत्वात्

ना

७

14



घटबोधवत् बोधांत्तरसन्नभिद्यते बोधत्वात् स्वप्नबोधवत्
फलितं कथयन्नुक्तन्यायमत्राप्यतिदिशति ॥ एवमित्यादि
नास्थानत्रयेपि एकदिनवर्त्तिजाग्रदाद्यवस्थात्रयेपि
संविदेकैव सर्वं वा कथं सावधारणमिति न्यायात् गत
क दद्दिनांतर इति ॥ यथैकस्मिन् दिवसे अवस्था[illegible]त्रये
पिक्षानस्याभेद एवमन्यस्मिन्नपि दिवसेऽनेकधाऽ
नेकप्रकारेण गतागम्येष्वतीतानागतेषु मासेषुचै

९ ट०

८ त्रादिषु अब्देषु प्रभवादिषु युगेषु कृतादिषु कल्पेषु ब्राह्म्यादि
दिषु ष्ठानस्याभेदऽवेऽयर्थः ॥ संविदऽस्वकृत्वसमर्थने फल
माह ॥ ६ ॥ मासाब्दयुगकल्पेषु गतागम्येष्वनेकधा ॥
नोदेति नास्तमेऽयेका संविदेषा स्वयंप्रभा ॥ ७ ॥ इयमाऽमा
परानंदः परप्रेमास्पदं यतः ॥ ७ ॥ नोदेतीति ॥ यतः
संविदेकाऽतो नोदेति नोत्पद्यते नास्तमेति न विनस्यतीत्व ॥
असाक्षिकयोः उत्पत्तिविनाशयोरसिद्धेः स्वोत्पत्तिवि ८

16

नानायोस्त्वेवसंविदाग्रहितुमनाक्यत्वात्संविदंतराभा
वाच्चेतिभावः ननुसंविदंतराभावेग्राहकाभावादस्या
प्यभानेजगदांध्यंप्रसज्येतेत्यत आह ॥ ३ बेतिअत्रा
यंप्रयोगः ॥ संविद्स्वयंप्रकाशाभवितुमर्हतिअवे
द्यत्वेसत्यपरोक्षऽवाद्यतिरेकेघटवन्नचायंविशेष
णासिद्धोहेतुः संविदः स्वसंवेद्यत्वेकर्मकर्तृऽवि
रोधापरवेद्यत्वेऽनवस्थानादतः स्वप्रकाशा[illegible]त्वे

यथापर्वतोवह्निमान्नीलधूमवत्त्वात् ॥

न भासमानायाः संविदः सर्वावभासकत्वसंभवा
भजगदांध्यप्रसंग इति भावः ॥ भवत्वेवं संविदो नि
त्यत्वं स्वप्रकाशत्वं च ततः किमित्यत आह ॥ इयमिति
अत्रायं प्रयोगः ॥ इयं संविदात्मा भवितुमर्हतीति नि
त्यत्वे सति स्वप्रकाशत्वात् यन्नैवं न तदेवं यथा घ
ट इति आत्मनो नित्यत्वसंविद्रूपत्वप्रसाधनेन स
त्यत्वमपि साधितं भवति ॥ नित्यत्वातिरिक्तसत्यत्वा



यकृत्रयान्न तस्य पदस्य अन्यत्रयाजन

भावान्नित्यत्वं सत्यत्वं यदस्यास्ति तन्नित्यं सत्यमिति
वाचस्पतिमिश्रैरुक्तत्वादिति भावः ॥ आत्मन आनंदरू
पत्वं साधयति परानंद इति ॥ आत्मेत्यनुषज्यते ॥ पर
स्यासावानंदश्च परानंदः निरतिशयसुखस्वरूप
इत्यर्थः ॥ तत्र हेतुमाह ॥ परेति यतो यस्मात्कारणा
त्परस्य निरुपाधिकत्वेन निरतिशयस्य प्रेम्णः स्ने
हस्य आस्पदं विषयः तस्मादत्रेदमनुमानमात्मा

पं०　　　　　　　　　　　　　　　　　　　　　　　　　　　　द०

१० परमानंदरूपः परप्रेमास्पदत्वात् यः परमानंदरूपो
नभवति नासौ परप्रेमास्पदमपि यथा घटो न तथा
चायं परप्रेमास्पदं न भवति त तस्मात् परमानं
दरूपो न भवतीति ॥८॥ मा न भूवं हि भूयासमि
ति प्रेमाऽऽत्मनीक्ष्यते ॥ तत्प्रेमाऽऽत्मार्थमन्यत्र नैव
मन्यार्थमात्मनि ॥ ९ ॥ अतस्तत्परमं तेन परमा
नंदतात्मनः ॥ १ ॥ ननु आत्मनि चिकूमामिंति १०

द्वेषस्योपलभ्यमानत्वात् प्रेमास्पदत्वमेवासिध्धं कुतः परप्रेमास्प
दत्वमित्याशंक्य तस्य द्वेषस्य दुःखसंबंधनिमित्तकत्वेनान्य
थासिध्धत्वात् प्रेम्णश्चात्मनि अनुभवसिध्धत्वान्मैवमिति
परिहरति ॥ मा न भूवमिति ॥ हि यस्मात्कारणात् अहमवि
षये मा न भूवं अहं मा भूवमिति न ममास्त्वैकदापि
मा भूत्किं तु भूयासमेव सदा सत्वमेव ममम भूयादित्ये

पक्षसाध्ययोः हत्वभावः स्वरूपासिद्धिः ॥ पर्वतो वह्निमान् अरत्वात् यथेति ॥

[illegible]वं विधधर्मे मेध्यते सर्वैरनुभूयते ॥ अतो नासिद्धिरित्यर्थः ॥
माभूत् स्वरूपासिद्धिः धर्मिणः पक्षेमानाभावात् ॥ विशेष
णासिद्धिर्हेतोरित्याशंक्याह ॥ तद्धर्मेति ॥ अन्यत्रे स्वाति
रिक्ते पुत्रादौ यद्धर्मतदाऽऽत्मार्थं तेषामाऽऽत्मशेषत्वनिमित्तक
मेव न स्वाभाविकं हव माऽऽत्मनि विद्यमानं धर्मान्यार्थं ना
ऽऽत्मनोऽन्यशेषत्वनिमित्तकं न भवति किंत्वात्मत्वनि
मित्तकमेवातो निरूपाधिकऽयात्सऽपरमं निरतिशयं फलि

तमाह तेनेति ॥ तेन निरतिशयब्रह्मस्वरूपत्वेनात्मनः प
रमानंदता निरतिशयसुखरूपत्वं सिद्धं ॥ २ तैः सप्त
भिः श्लोकैः प्रतिपादितमर्थं संक्षिप्य दर्शयति ॥ ९ ॥
इत्थं सच्चिदानंद आत्मा युक्त्या त[illegible]था विद्धं ॥ एवं
ब्रह्मातयोश्चैक्यं श्रुत्यंतेषु दृश्यते ॥ १० ॥ तत्त्वमिति ॥
बौद्धस्य पक्वादि यद्वस्यादिनोक्षानस्य नित्यत्वं च साध्य
तस्यैवेयमात्मेत्यात्मत्वं च साधनेनात्मनः सच्चि



पं
१२ रूपत्वं साधितं परमानंद इत्यादिना च परमानंदरूप ए०
त्वं समर्थितं [redacted] अतः आत्मा माहावाक्ये त्वंपदार्थः
सच्चिदानंदरूपः सिद्धः ॥ ननु तल्लक्षणस्यात्मनो यु
क्त्यैवावगतावुपनिषदां निर्विषयत्वेनाप्रामाण्य
प्रसंग इत्याशंक्याह ॥ तथाविधमिति तथा तादृ
क्विधाप्रकारो यस्य तत् तथाविधं सच्चिदानंदरूपं
परंब्रह्म तत्पदार्थः तयोस्तत्त्वंपदार्थयोरैक्यमवैतै १२

२४

कऽसत्वंच श्रुत्यंतेषु वेदांतेषु उपदिश्यते इति पाचशे ॥ अतो न वेदांतानां नि
र्विषयत्वमित्यर्थः ॥ आत्मनः परमानंदरूपत्वमाक्षिपति ॥ ७ ॥
अभाने न परंप्रेम भाने न विषयस्पृहा ॥ अतो भानेप्यभा
नासो परमानंदताऽत्मनः ॥ ८ ॥ अभान इति ॥ परमानंदरू
पत्वं भासते न भासते वा ॥ अभानेऽअप्रतीतौ न परं प्रेमाऽत्म
नि निरतिशयस्नेहो न स्याद्विषयसौंदर्यभानजन्यत्वात्
स्नेहस्य भाने प्रतीतौ तु विषयेषु नव साधने[illegible]गादौ तन्न



नस्या

न्येस्तुन्वेवास्यहार्दद्योऽफलत्वात्सोऽस्त्यांस्साधनेऽत्मोनुपपत्तेः॥नि
स्यनिवृत्तिवायानंदलाभेसतिक्षणिकेसाधनपारतंत्र्यादिदोष
दूषितेवैषयिकेस्तुन्वेस्यहायोगाच्चतस्मान्नानंदरूपताऽमन
नुपपन्नेतिप्रकारांतरस्यात्रसंभवान्नैवमितिपरिहरति॥
अतइतियतोभानाभानपक्षयोरुभयोरपिदोषोऽस्त्यतःका
रणादात्मनोऽसौपरमानंदताभानेपिव्रतीतोऽस्त्याम
पिअ[illegible]भाता[illegible]त्रतीतिर्नभवति॥११॥ श्रीरामचंद्रप्रभुः॥

अध्येतृवर्गमध्यस्थपुत्राध्ययनशब्दवत्।। भानेप्यभानंभानस्यप्र
तिबंधेनयुज्यते।।१२।। नन्वेकस्ययुगपद्भानाभानेनयुज्येतेइत्याशं
क्यकिमिदमयुक्तऽवंअदृष्टचरऽवंउपपत्तिरहितऽवंवानाद्यइत्या
ह।। अध्येतृवर्गेति।। अध्येतृणांवेदपाठकानांवर्गःसमूहः
तस्यमध्येतिष्ठतीतिअध्येतृवर्गमध्यस्थःसचासोपुत्र
श्चेतितथा तस्याध्ययनंतत्कर्तृकंपठनंतस्यशब्दोध्वनि।
र्यथाबहिस्थस्य [illegible] पितुर्भासमानोपिसामान्यतोनभासते
विशेषतोयंमऽपुत्रध्वनिरिति।।



प० १४

८०

तथांनदस्यापि भानेप्यभानं भवतीत्यर्थः॥ द्वितीयं व्रत्याह॥
भानस्येति॥ भानेप्यभानमित्येतदत्रापि अनुबं[illegible]यँ भान नी
स्यस्फुरणस्य प्रतिबंधेन वक्ष्यमाणलक्षणेन भानेप्यभा
नं सामान्यतः प्रतीतावपि विशेषाकारेण प्रतितीयुत्यतेउपपद्यते
इत्यर्थः॥ कोसौ प्रतिबंध इत्यत आह॥१२॥ प्रतिबंधोस्ति
भातीति व्यवहारार्हवस्तुनि॥ तं निरस्य विरुध्धस्य तस्योत्पा
दनमुच्यते॥१३॥ तस्य हेतुः समानाभिहारः पुत्रध्वनिश्रु
तौ॥ दर्शनादिरविद्येव व्यामोहैके[illegible]निबंधनौ॥१४॥ छ॥ ध॥

१०

28

प्रतिबंधइति॥ अस्तिभातीति व्यवहारार्हवस्तुनि अस्तिवि
द्यते भाति प्रकाशते इत्येवंप्रकारं व्यवहारमर्हतीत्यस्ति
भातिव्यवहारार्हं तच्च तद्वस्तु चेति तथा तस्मिन्नुक्ते पूर्वो
क्तं व्यवहारं निरस्य निराकृत्य वितथस्य नास्ति न भाती
त्येवंरूपस्य तस्य व्यवहारस्योऽपादनं अननं प्रतिबंध
इत्युच्यते॥ उक्तलक्षणस्य प्रतिबंधस्य कारणं दृष्टांत
दार्ष्टांतिकयोः क्रमेण दर्शयति॥१३॥ तस्येति॥ पुत्रध्वनि

श्रुतौ पुत्रध्वनिश्रवणलक्षणे दृष्टांते तस्य प्रतिबंधस्य हेतुः
कारणं समानाभिहारः बहुभिः सहपाठनं इह दार्ष्टांतिके
व्यामोहैकनिबंधनं व्यामोहानां विपरीतज्ञानानामे
कनिबंधनं मुख्यकारणमनादिरुत्पत्तिरहिताऽविद्या
वक्ष्यमाणाप्रतिबंधस्य हेतुरित्यर्थः॥ इदानीं प्रतिबंध
हेतुमविद्यां प्रतिपादयितुं तन्मूलभूतां प्रकृतिं व्युत्पा
दयति॥१७॥ चिदानंदमयब्रह्मप्रतिबिंबसमन्विता॥

तमोरजःसत्वगुणाप्रकृतिर्द्विविधाचसा॥१५॥सत्वशुध्य
विशुध्धिभ्यांमायाविद्येचतेमते॥मायाबिंबोवशीकृत्य
तांस्यात्सर्वज्ञईश्वरः॥१६॥चिदानंदेति॥चिदानंदरूपं
ब्रह्मतस्यप्रतिबिंबेनप्रतिछाययासमन्वितायुक्ता
तमोरजःसत्वगुणाःसत्वरजस्तमोगुणानांसाम्यावस्था
यासाप्रकृतिरुच्यतेसाद्विविधाद्विप्रकाराभवतिच
काराद्वक्ष्यमाणं॥प्रकारांतरंसूचयति॥१५॥सहेतुकं

पं॰ ८०

१६ द्वैविध्यमेव दर्शयति॥ सत्वेति॥ सत्वस्य प्रकाशात्मकस्य
गुणस्य शुद्धिः गुणांतरेणाकलुषीकृतता अविशुद्धिः गु
णांतरेण कलुषीकृतत्वं ताभ्यां सत्वशुद्ध्यविशुद्धिभ्यां
ते च द्विविधे मायाविद्ये मायेऽयविद्येति च मते समंते
विशुद्धसत्वप्रधाना माया मलिनसत्वप्रधानाऽविद्या
इत्यर्थः॥ यदर्थं मायाविद्ययोर्भेद उक्तस्तदिदानीं दर्शयि
ति॥ मायाबिंबदति॥ मायायां बिंबः मायायां प्रतिफलि

१६

तश्चिदाऽत्मातां मायांवशीकृत्यस्वाधिनींकृत्यवर्तमानः
सर्वज्ञः सर्वज्ञत्वादिगुणकेःईश्वरः स्यात् ॥१६॥ छ
अविद्यावनागस्त्वन्यस्तद्वैचित्र्यादनेकधा ॥ साका
रणशारिरं स्यात्तस्यात्मत्वाभिमानवान् ॥१७॥
अविद्यावनाग इति ॥ अविद्यायां प्रतिबिंबत्वेन
तत्परतंत्रस्तु चिदात्माऽन्यो जीवः स्यात् सच तद्वैवि
वै च्यात्तस्या अविद्यायाः उपाधिभूतायो[illegible] चित्र्या

दृविशुद्धितारत[illegible]म्याद्[illegible]अनेकधाअनेकप्रकारः
देवतिर्यगादिभेदेनविविधोभवतीत्यर्थः॥यथामुंजा
दिषीकेवमाऽमायुत्यासमुध्दतःशारीरत्रितयाद्धीरैःप र
रबेध्नेवआयतदत्यक्तं[illegible]शारीरत्रितयाद्विवेचितस्यजीव
स्यपरब्रह्मत्वंवक्ष्यति तत्र तानिकानि॥त्रीणिशरीरा
णितदुपाधिकोवाजीवः किंतपो[illegible]भवतीत्याकांक्षा
यांतत्सर्वंक्रमेणव्युत्पादयति॥साकारणशरीर

१७

मित्यादिनासाऽविद्याकारणशरीरं स्थूलसूक्ष्मशरीरा
दिकारणभूतत्रकृत्यवस्थाऽविनोपला[illegible]कारणमुपचा
र्यते॥ तत्त्वज्ञानान्नश्यतिचेतिशरीरं स्यात्तत्
कारणशरीरेऽभिमानवानुतादात्म्याध्यासेनाह
मित्यभिमानवानुजीवः ओक्षः ओ[illegible]ज्ञाऽविनाशी
स्वरूपानुभवरूपायस्यसप्रज्ञः प्रज्ञएवप्राज्ञः।
एतन्नामकस्यादित्यर्थः॥१७॥ तमःप्रधानप्रकृ

१०   ग्गासनादि॥ ८०

१९ तेस्तद्भोगायेश्वराज्ञया॥ वियत्पवनतेजोंबुभुवोभू
तानिजज्ञिरे॥१८॥ क्रमश्रास्तंसूक्ष्मशरीरं तदुपाधि
कंजीवंचव्युत्पादयितुंतत्कारणकोभा दिस्थाच्छिमा
ह॥ तमःप्रधानेति॥ तद्भोगायतेषांप्राणिनांभो
गायसुखदुःखसाक्षात्कारसिद्धयेतमःप्रधानप्र
कृतेस्तमोगुणप्रधानायाःप्रकृतेःपूर्वोक्तायाउपादा
नकारणभूतायाःसकाशादीश्वराज्ञयाईशानोदि १९

शक्तियुतस्यजगदधिष्ठातुःआत्तयाइक्षापूर्वकंस्रजनेच्छारूप
यानिमित्तकारणभूतयावियदादीनिपृथिव्यंतानिभूतानि
जक्षितेश्वराद्भूतान्युत्पन्नीनीत्यर्थः॥भूतस्रष्टिमभिधा
यभौतिकस्रष्टिमभिदधानःआदौज्ञानेंद्रियस्रष्टिमा
ह॥१८॥सत्वांशैःपंचभिस्तेषांक्रमाद्धींद्रियपचकं॥श्रो
त्रत्वगक्षिरसनघ्राणाख्यमुपजायते॥१९॥तैरंतःकर
णंसर्वैःवृत्तिभेदेनतद्द्विधा॥मनोविमर्शरूपंस्याद्बुद्धिः

स्यान्निश्चयात्मिका।।२०।। रजोंऽशैः पंचभिस्तेषां क्रमात्कर्मे-
ंद्रियाणि तु।। वाक्पाणिपादपायुपस्थाभिधानानि जज्ञिरे।।२१।।
सत्त्वांशैरिति।। तेषां वियदादीनां पंचभिः सत्त्वांशैः सत्त्वगु-
णभागैरुपादानभूतैः श्रोत्रत्वगक्षिरसनघ्राणाख्यं [illegible]
धींद्रियपंचकं [illegible]द्रियाणि ज्ञानेंद्रियाणि तेषां पंचकं क्रमादुपजा-
यते।। एकैकभूतसत्त्वांशादेकैकमिंद्रियं जायत इत्यर्थः।। स-
त्त्वांशानां प्रत्येकमसाधारणकार्याण्यभिधाय सर्वेषां
धी°

38

साधारणं कार्यमाह ॥ १४ ॥ तेऽंतःकरणमिति ॥ तैः सह
सत्वांशैः सर्वैः संभूय वर्तमानेऽंतःकरणं मनोबुद्ध्युपादा
नभूतं द्रव्यमुपजायते इत्यनुषंगः ॥ तस्यावांतरभेदं
सनिमित्तमाह ॥ वृत्तीति ॥ तदंतःकरणं वृत्तिभेदेन
परिणामभेदेन द्विधा द्विप्रकारं भवति ॥ वृत्तिभेदमे
वदर्शयति ॥ मन इति विमर्शरूपं विमर्शः संज्ञयाभि
कावृत्तिः सा स्वरूपं यस्य तत्तथा तन्मनः स्यात् निश्च

पं॰
१०

द॰

यात्मिका निश्चयोऽध्यवसायः स आत्मा स्वरूपं यस्याः
सा निश्चयात्मिका सा वृत्तिः बुद्धिः स्यात् तु क्रमशस्ता
नां इंद्रियाणां च प्रत्येकमसाधारणकार्याण्याह ॥२०॥
इंद्रियैः इति गतेषां वियदादीनां एवं पंचभिः इंद्रियैः
इंद्रियो भागे [illegible] रूपादान भूतैर्वा[illegible]गाद्यभिधानानि क्रि
याजनकानि इंद्रियाणामेवसाधारणं कार्यमाह ॥२१॥
तैः सर्वैः सहितैः प्राणो वृत्तिभेदाऽस पंचधा ॥ प्राणोपानः

१०

समानश्चोदानव्यानौ च ते पुनः ॥२२॥ तैः सर्वैरिति ॥ सहितैः संभू
यकारणतां गतैः प्राणो जायत इति शेषः ॥ तस्यावांतर[illegible]दमाह ॥ वृ
त्तिभेदादिति ॥ स प्राणो वृत्तिभेदात्प्राणापानादिव्यापारभेदा
त्पंचप्रकारो भवति ॥ वृत्तिभेदानेव दर्शयति ॥ प्राण इति ॥ ते पुन
स्ते तु भेदाः प्राणापानादिनाम्ना वाच्या इत्यर्थः ॥२२॥ यदर्थमा
काशादिप्राणान्तानां सृष्टिस्तत्तदिदानीं दर्शयति ॥ बुद्धिक
र्मेंद्रियप्राणपंचकैर्मनसा धिया ॥ शरीरं सप्तदशभिः सूक्ष्मं
तल्लिंगमुच्यते ॥२३॥

बुध्धीति।। बुध्धयोक्तानानि कर्माणि व्यापाराः तज्जनकानींद्री
याणि बुध्धिकर्मेंद्रियाणि बुध्धींद्रियाणि कर्मेंद्रियाणि चेत्यर्थः बुध्धि
कर्मेंद्रियाणि च प्राणाश्च बुध्धिकर्मेंद्रियप्राणाः तेषां पंचकानि ते
र्मनसा विमर्शात्मकेन धियनिश्चयरूपया बुध्या च सह स
प्तदशाभिः सप्तदशसंख्याकैः सूक्ष्मशरीरं भवति।। तस्यैव
संज्ञांतरमाह।। तल्लिंगमिति।। उच्यते वेदांतेषु इत्यर्थः।।२३।।
एवं सूक्ष्मशरीरमभिधाय तदभिमानप्रयुक्तं ज्ञानैश्वर्ययो
रवस्थांतरं दर्शयति।।

२

आत्मस्तत्राभिमानेन तैजसत्वं प्रपद्यते ॥ हिरण्यगर्भतामीश
स्तयोर्व्यष्टिसमष्टिता ॥ २४ ॥ आत्मा इति ॥ आत्मा मलिनस
त्वप्रधानाविद्योपाधिको जीवस्तत्र तेजः नाद्व वाच्यांतःकर
णोपलक्षितलिंगनाशरीरेहमभिमानेन तादात्म्याभिमाने
न तैजसनामकत्वं प्रपद्यते प्राप्नोति ॥ ईशः विशुद्धसत्वप्र
धानमायोपाधिकः परमेश्वरः तत्र शरीरेहमभिमानेन
हिरण्यगर्भतां हिरण्यगर्भसंज्ञकत्वं प्रपद्यत इत्यनुषंगः ॥

पं॰ २०

२२ तैजसहिरण्यगर्भयोर्लिंगशरीराभिमानित्वेसमानेसति॥
तयोः परस्परभेदः किंनिबंधन इत्यत आह॥ तयोरिति॥ तयो
स्तैजसहिरण्यगर्भयोः व्यष्टित्वंसमष्टित्वंचभवतिततए
व भेद इत्यर्थः॥२४॥ समष्टिरीशः सर्वेषां स्वात्मतादात्म्य
वेदनात्॥ तदभावात्ततोन्येतु कथ्यंते व्यष्टिसंज्ञया॥२५॥
ईश्वरस्यसमष्टिरूपत्वेजीवानांव्यष्टिरूपत्वेचकारणमाह॥
समष्टिरिति॥ इशः ईश्वरो हिरण्यगर्भः सर्वेषांलिंगशरीरा

२२

44

दोपाधिकानां तैजसानां स्वात्मतादात्म्यवेदनात्स्वात्मनाता
दात्म्यस्यैकत्वस्य वेदनात् ज्ञानात् समष्टिर्भवति ॥ तत
ईश्वरादन्ये जीवास्तु तदभावात् तस्य तादात्म्यवेदनस्या
भावात् व्यष्टिसंज्ञया व्यष्टित्वाद्वेन कथ्यंते ॥ २५ ॥ एवं
लिंगशरीरं तदुपाधिकौ तैजसहिरण्यगर्भौ च दर्शयित्वा
स्थूलशरीराद्युत्पत्तिसिध्धये [illegible] पंचीकरणं निरूपयितु
माह ॥ तद्भोगाय पुनर्भोग्यभोगायतनजन्मने ॥ पंचीक

दोतिभगवानुत्त्ऽयेकंवियदादिकं॥२६॥[illegible]॥तद्वोये
ति॥भगवानूऐश्वर्यादिगुणषट्कसंपन्नःपरमेश्वरःपुनःपुनरपि
तद्भोगायतेषांजीवानांभोगायेवभोग्यभोगायतनजन्मनेभो
ग्यस्यान्नपानादेर्भोगायतनस्यजरायुजादिचतुर्विधश
रीरजातस्यचजन्मनेऽत्पत्तयेवियदादिकंआकाशादिभू
तपंचकंप्रत्येकमेकैकंपंचीकरोति॥अपंचात्मकंपंचात्मकं
संपद्यमानंकरोति॥२६॥कथमेकैकस्यपंचात्मकत्वमि

ऽयत आह ॥ द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः ॥ स्वस्वे
रि तरद्वितीयांशैर्योजनात्पंच पंच ते ॥ २७ ॥ द्विधेति ॥ वियदादिक
मेकैकं द्विधा तंत्रेणोच्चौ तो द्विधा नाढ्यः विधाय कृत्वा भागद्वयो
पेतं कृत्वेत्यर्थः ॥ पुनश्च पुनरपि प्रथमं प्रथमं भागं चतुर्धा
भागचतुष्टयोपेतं विधायेत्यनुषज्यते ॥ स्वस्वेतरद्विती
यांशैः स्वस्माऽस्वादितरेषां चतुर्णां [redacted] चतुर्णां भूतानां
योयो द्वितीयस्थूलो भागस्तेन सह प्रथमप्रथमभागांशा
स्मा

८॰

पं॰

२४ नांचतुर्णांचतुर्णां मध्ये एकैकस्य योजनात्ते वियदादयः त्रत्ये
कं पंच पंचात्मका भवंति ॥२७॥ एवं पंचीकरणमभिधाय
तैर्भूतैरुत्पाद्यं कार्यवर्गं दर्शयति ॥ तैरंडस्तत्र भूवनभो
ग्यभोगाश्रयोद्भवः ॥ हिरण्यगर्भः स्थूलेस्मिन् देहे वै
श्वानरो भवेत् ॥२८॥ तैरंड इति ॥ तैः पंचीकृतैर्भूतैरु
पादानकारणभूतैरंडो ब्रह्मांडः उत्पद्यते तत्र ब्रह्मांडांतः
भूवनानि ऊपरिभागे वर्तमाना भूम्यादयः सप्तलोकाः २४

भूम्यरधःस्थितान्यतलादीनिसप्तपातालांतानितेषुभूवनेषु
तैस्तैप्राणिभिभोक्तुंयोग्यान्यन्नादीनितत्तल्लोकोचितशरीरा
णिचतैरेवपंचीकृतैर्भूतैरीश्वराज्ञयाजायंते।।एवंस्थूलश
रीरोत्पत्तिमभिधायतेषुशरीरेषुअभिमानवतोहिरण्य
गर्भस्यसमष्टिरूपस्यवैश्वानरसंज्ञकत्वंएकैकस्थूल
शरीराभिमानवतांव्यष्टिरूपाणांतैजसानांविश्वसंज्ञ
कत्वंचभवतिइत्याह।।हिरण्यगर्भइति।।अस्मिन्स्थूलदे

हे वर्तमानो हिरण्यगर्भो वैश्वानरो भवेत् ॥२८॥ तैजसा वि
श्वसांयाता देवतिर्यङ्नरादयः ॥ ते परागदर्शिनः प्रत्यक्
तत्त्वबोधविवर्जिताः ॥२९॥ तै[illegible]जसेति ॥ तत्रैव वर्तमाना
तैजसा विश्वा भवंति ॥ तेषामवांतरभेदमाह ॥ देवेति ॥
इदानीं तेषां विश्वसंज्ञां प्राप्तानां जीवानां तत्त्वरूपानरहि
तत्त्वेन संसारापत्तिप्रकारं सदृष्टांतं श्लोकद्वयेनाह ॥
ते परागिति ॥ ते देवादयः परागदर्शिनः बाह्यानेव कार्यादी

॥ जीवस्योपाधित्रयं ॥ प्राज्ञस्तैजसो विश्वं ॥ ईश्वरस्योपाधित्रयं हिरण्यगर्भवैश्वानर
॥ कारणोपाधि प्राज्ञ [illegible]

नेवपस्यंति॥ नतुप्रत्यगात्मानं परांचिनवानिव्यत्तृणत्स्वयं
भूतस्मात्पराङ्पस्यतिनांतराऽमन्नतिश्रुतेः ननुतार्किका
दयोदेहव्यतिरिक्तमात्मानंजानंतीत्याशंक्यथद्यप्यात्मा
नंतेजानंतितथापिश्रुतिसिध्धंतत्वंनजानंतिइत्याना
येनोक्तंमित्याह॥ प्रत्यगिति॥२९॥ कुर्वंतेकर्मभोगाय
कर्मकर्तुंचभुंजते॥ नयांकीठर्दवावर्लीहावर्तांसऽम
श्रुते॥३०॥ अतयवभोगायसुखाद्यनुभवायमनुष्या

KKSU LIBRARY
RAMTEK
441 106
M-1599
Dist. Nagpur

द॰

पं॰
२६

दिनाशीराण्यधिष्ठायकर्मत्ततच्छरीरोचितानिकर्माणिकुर्व
ते।जातावेकवचनंपुनश्चकर्मकर्तुंदेवादिशरीरैःतत्तू
फलंभुंजतेच।।फलानुभवाभावेत॰तत्सजातीयेच्छानु
पपत्यातत्तत्साधनानुष्ठानानुपपत्तेरेवंवर्तमानाले
जीवाःनदीप्रवाहपतिताःकीटाश्चावर्तादावर्तांतर
मनुव्रजंतोयथानिर्वृतिंसुखंनलभंतेएवमास्सुजन्म
नोजन्मव्रजंतःसुखंनैवलभंतइतिएवंसंसारापत्तिः।। २६
३०।।

त्यथा३०

१वं॥ भ्रमंतोजन्मनोजन्मलुभंतेनैवनिर्वृतिं॥सत्कर्मपरिपाकांस्तेकरुणा
निधिनोद्धताः॥२१॥नैवलंभतइतिसंसारापत्तिमभिधाय
त्यू तन्निवृ[illegible]पायंदर्शयितुंदृष्टांतंतावदाह॥सत्कर्मेति॥ते
कीटाःसत्कर्मपरिपाकाऽपूर्वोपार्जितपुण्यकर्मपरिपाका
ऽत्कृपालुनाकेनचित्पूरुष[illegible]विशेषेणोद्धृताःनदीप्रवाहाद्
[illegible]हिःनिःसारिताःसंतः॥[illegible]॥आप्यतीरतरुच्छायांविश्रा
म्यंतियथासुखं॥उपदेशमवाप्यैवमाचार्यात्तत्वदर्शिनः॥२२॥

५३

प्राप्येति॥ नीरूतरक्षां यां प्राप्य सुखं यथा भवति तथा यद्वि
२१॥ श्राम्यंति॥ इदानीं दृष्टांते सिद्धमर्थं दार्ष्टांतिके योजयति॥
उपदेशमिति॥ एवमुक्तेन प्रकारेण पूर्वोपार्जितपुण्यकर्म
परिपाकवशादेव तत्त्वदर्शिनः प्रत्यगभिन्नब्रह्मसाक्षात्कार
दि॥ वतः आचार्याद्गुरोः सकाशादुपदेशं तत्त्वमस्यो वाक्यार्थ
ज्ञानसाधनं श्रवणं वक्ष्यमाणमवाप्य संपाद्य॥ ३२॥
पंचकोशविवेकेन लभंते निर्वृतिं परां॥ अन्नं प्राणो मनो बुद्धि
रानंदश्चेति पंच ते॥ ३३॥

पंचकोशेति ।। पंचकोशाविवेकेनान्नादीनां पंचानां कोशानां विवे
केन वक्ष्यमाणविवेचनेन परां निर्वृतिं मोक्षसुखं लभंते आप्नु
वंति ।। ते केऽन्नाद्यः पंचकोशा इत्याकांक्षायां तानुपदिशति
अन्नमिति ।। अन्नं प्राणो मनो बुद्धिरानंदश्चेति एते पंचकोशाः
वि बुद्धिर्ज्ञानं ।। ३३ ।। कोशैस्तैरावृतः स्वात्मा विस्मृत्या संसृतिं
व्रजेत् ।। स्यात् पंचीकृतभूतोत्थो देहः स्थूलोऽन्नसंज्ञकः ।। ३४
तेषामन्नादीनां कोशानां बाह्याभिधेयत्वे कारणमाह ।। कोशैस्तैरि
ति ।। तैः कोशैरावृतः आच्छादितः स्वात्मा स्वरूपभूत आत्मावि

पं॰ द॰

२८ विस्मृत्या स्वस्वरूपविस्मरणेन संसृतिं जननादिरूपं संसारं भ्र
जेत्॥ स्पष्टं यथा कोशो कोशाकारः कमिरावरकत्वेन कोशा हेतुरेवं
मन्नादयोप्यद्वयानंदस्याच्छादकत्वेनात्मनः कोशरूपत्वात्को
शा इत्युच्यंते इत्यर्थः॥ तेषां कोशानां स्वरूपाणि क्रमेण व्युत्पा
दयति॥ स्यात्पंचीकृतेत्यादिना मोदादिवृत्तिभिरित्यंतेन
सार्धद्वयेन पंचीकृतेभ्यो भूतेभ्योउत्पन्नः स्थूलो देहोऽन्न
संज्ञकः अन्नमयशब्दितः कोशः स्यात्॥ ३३ ॥ लिंगे तु राजसैः २८

प्राणैः प्राणकर्मेंद्रियैः सह॥ सात्त्विकैः धींद्रियैः साकं विमर्शात्मा मनोमयः॥३५॥ लिंगेति॥ प्राणस्तु प्राणमयकोशस्तु लिंगे लिंगशरीरे वर्तमानै राजसै रजोगुणकार्यभूतैः प्राणैः प्राणापानादिभिर्वायुभिः पंचभिर्वागादिभिः कर्मेंद्रियैः सह दशभिः स्यात्॥ विमर्शात्मा संशयात्मकं पंचभूतसत्त्वकार्यं यन्मनस्तेन तत्सात्त्विकैः प्रत्येकं भूतसत्त्वकार्यभूतैः धींद्रियैः श्रोत्रादिभिः पंचभिः ज्ञानेंद्रियैः साकं सहितं मनोमयः कोशः स्यादिति पूर्वेण संबंधः॥३५॥

तैरेव साकं विज्ञानमयो धीर्निश्चयात्मिका ।। कारणे सत्वमा
नंदमयो मोदादिवृत्तिभिः ।। ३६ ।। तैरेवेति ।। निश्चयात्मि
का धीस्तेषामेव सत्वकार्यरूपा बुद्धिस्तैरेव पूर्वोक्तैर्ज्ञानेंद्रि
यैरेव साकं सहिता सती विज्ञानमय विज्ञानमयाख्यः को
नाः स्यात् ।। कारणे कारणशरीरभूतायामविद्यायां यन्म
लिनसत्वमस्ति तन्मोदादिवृत्तिभिः प्रियमोदप्रमोदाख्यै
रिष्टदर्शनलाभभोगजन्यैः सुखविशेषैः सहितमानंदम

रपचूनि

यआनंदमयांवव्यः कोशाःस्यात्॥ ननुस्थूलशरीरादीना
मन्नमयादिशब्दवाच्यत्वे सवाएषपुरुषोऽन्नरसमयइत्युप
क्रम्यतस्माद्वाएतस्मादन्नरसमयादन्योंतरआत्माप्रा
णमयोऽन्योंतरआत्मामनोमयइत्यादिश्रुतत्वादाऽमनो
न्नमयादिशब्दवाच्यत्वंकथमुच्यतइत्याशंक्यदेहादी
नामन्नादिविकारत्वेनान्नमयादिशब्दवाच्यत्वंआत्म
स्तुतेनकोशोनतादात्म्याभिमानादित्याह॥ [illegible] ६४

पं॰ द॰

३० तत्तत्कोशैस्तु तादात्म्यादात्मा तत्तन्मयो भवेत्॥३५॥ तत्तदिति॥ आत्मा प्रत्यगात्मा तत्तत्कोशैस्तेन तेन कोशेन सह तादात्म्यात्तादात्म्याभिमानात्तत्तन्मयस्तत्तत्कोशमयः स्याद्व्यवहारकालेऽन्नम[illegible]यादिकोशप्राधान्यादन्नमयादिशब्दवाच्य इत्यर्थः॥ तुशब्द आत्मनः कोशेभ्यो वैलक्षण्यद्योतनार्थः॥३६॥ अन्वयव्यतिरेकाभ्यां पंचकोशविवेकतः स्वात्मानं तत उद्धृत्य परं ब्रह्म प्रपद्यते॥३७॥ कथं तर्ह्येवंविधस्यात्मनो ब्रह्मत्वं भवतीत्याशंक्य कोशेभ्यो विवेचनाद्भवतीत्याह॥ अन्वयेति॥ अन्वयव्यतिरेकाभ्यां वक्ष्यमा ३०

60

णाभ्यां पंचकोशाविवेकतः पंचानां कोशानामन्नमयादीनां विवेकतः
प्रत्यगात्मनो विवेचनेन पृथक्करणेन यद्वा पंचकोशाभ्योऽन्नमयादिभ्य
आत्मनः पृथक्करणेन स्वात्मानं प्रत्यगात्मानं ततस्तेभ्यः कोशाभ्योऽ
द्धृत्य बुध्या निष्कृष्य चिदानंदस्वरूपं निश्चित्य परं ब्रह्म पूर्वोक्तलक्षि
णं प्रपद्यते प्राप्नोति ब्रह्मैव भवति इत्यर्थः ॥३७॥ अभाने स्थूलदेह
स्य स्वप्ने यद्भानमात्मनः ॥ सोऽन्वयो व्यतिरेकस्तद्भानेऽन्योऽनव
भासनं ॥३८॥ इदानीं विवक्षितावन्वयव्यतिरेकौ दर्शयति ॥
अभान इति ॥ स्वप्ने स्वप्नावस्थायां स्थूलदेहस्याऽन्नमयकोशस्या
भानेऽप्रतीतौ सत्यामात्मनः प्रतीचो यद्भानं स्वप्नसाक्षित्वेन य
स्फुरणमस्ति ॥

सआऽत्मनोऽन्वयस्त[illegible]स्यामेव स्वप्नावस्थायां तद्भाने[illegible]तस्यात्म
नःस्फुरणे सति अन्यानवभासनमन्यस्य स्थूलदेहस्यानवभास
नमवृत्तीतिः व्यतिरेकः स्थूलदेहस्येति बोधः ॥ अस्मिन्नूप्रकरणेऽन्व
यव्यतिरेकनाह्वाभ्यामनुवृत्तिव्यावृत्ती उच्येते ॥ ३८ ॥ लिंगा
भाने सुषुप्तौ स्यादात्मनो भानमन्वयः ॥ व्यतिरेकस्तु तद्भा
नेलिंगस्याभानमुच्यते ॥ ३९ ॥ एवं स्थूलदेहस्यानाऽत्मत्वं च बो
धकावन्वयव्यतिरेकौ दर्शयित्वा लिंगदेहस्य तथात्वावगम
कौ तौ दर्शयति ॥ लिंगेति ॥ सुषुप्तौ सुषुप्त्यवस्थायां लिंगाभाने लिं
गस्य सूक्ष्मदेहस्य ॥ २१

62

भानेऽप्रतीतौ आत्मनो भानं तदवस्थासाक्षित्वेन स्फुरणमात्म
नोऽन्वयः स्यात्तद्भाने आत्मभाने लिंगस्याभानं लिंगदेहस्य व्य
तिरेक इत्युच्यते ॥३९॥ तद्विवेकाद्विविक्ताः स्युः कोशाः प्राणमनो
धियः ॥ ते हि तत्र गुणावस्थाभेदमात्रात्पृथक्कृताः ॥४०॥
ननु पंचकोशविवेचनमुपक्रम्य लिंगदेहविवेचनं प्रकृतासं
गतमित्या[illegible]शंक्य प्राणमयादिकोशत्रितयस्य तत्रैवां
तर्भावान्न प्रकृतासंगतमित्याह ॥ तद्विवेकादिति ॥ तस्माल्लिं
गशरीरस्य विवेचनात्प्राणमनोधियः एतन्नामकाः कोशाः
विविक्ताः ॥

पं: च ३ः

३२।। आऽत्मनः पंचकोशाः स्युः कुतद्रूपत्वत आह।। तेहीति।। हियस्मात्का
रणात्ते प्राणमयादयः तत्र तस्मिन् लिंगशरीरे गुणावस्थाभेद
मात्राद्गुणयोः सत्वरजसोरवस्थाभेदमात्राद्गुणप्रधानेभा
वेनावस्थानविशेषादेव पृथक्कृताः भेदेन निर्दिष्टा इत्यर्थः
।।४०।। सुषुप्त्यभाने भानं तु समाधावात्मनोऽन्वयः।। व्य
तिरेकस्त्वात्मभाने सुषुप्त्यनवभासने।।४१।। इदानीमा
नंदमयकोशत्वेन विवक्षितस्य कारणशरीरस्य विवेचनो
पायमाह।। सुषुप्तीति।। समाधौ वक्ष्यमाणलक्षणायां ३२।।

समाध्यवस्थायां सुषुप्त्यभाने सुषुप्तिशब्दोपलक्षितस्य कारणदेहरूपस्याज्ञा
नस्याप्रतीतौ आत्मनः तुशब्दोऽवधारणे आत्मन एव भानं स्फुरणं यदस्ति
स आत्मनोऽन्वयः॥ आत्मभाने आत्मनः स्फुतौ सत्यां सुषुप्त्यनवभा
सनं सुषुप्त्युपलक्षितस्याज्ञानस्याप्रती तिरेवं व्यतिरेकस्तस्ये
ति॥ अत्रायं प्रयोगः॥ प्रत्यगात्मा अन्नमयादिभ्यो भिद्यते तेषु पर
स्परं व्यावर्तमानेष्वपि स्वयमव्यावर्तत्वात् यद्येषु व्यावर्तमा
नेष्वपि न व्यावर्तते तत्तेभ्यो भिद्यते यथा कुसुमेभ्यः सूत्रं य
था वा खंडादिव्यक्तिभ्यो गोत्वमिति॥४१॥ यथा मुंजादिषीकैवमा
त्मा युक्त्या समुद्धृतः॥ शरीरत्रितयाद्धीरैः परंब्रह्मैव जायते॥४२॥

अन्वयव्यतिरेकाभ्यां कोशापंचकाद्विविक्तस्याऽत्मनो ब्रह्मत्वाविर्भव
तीत्यर्थः ॥ तत्प्रतिपादिकामंगुष्ठमात्रः पुरुषोंऽतरात्मेत्यादिकां तं
विद्याच्छुक्रममृतमित्यंतां कठश्रुतिमर्थतः पठति ॥ यथेति ॥ य
थायेन प्रकारेण मुंजादेस्तन्नामकात्तृणविशेषादिषीका गर्भस्थं
कोमलतृणं युक्त्या बहिरावरकत्वेन स्थितानां स्थूलपत्राणां
विभजनैलक्षणेनोपायेन समुद्ध्रियते ॥ एवमात्माऽपि युक्त्याऽ
न्वयव्यतिरेकेणोपायेन शरीरत्रितयात्पूर्वोक्ताच्छरीरत्रितया
द्धीरैः ब्रह्मचर्यादिसाधनसंपन्नैरधिकारिभिः समुद्धृतः प

[illegible]

थकृतश्चेत्सूस परब्रह्मैवजायते विदानंदरूपत्वस्य लक्षणस्योभयो
इविशिष्टत्वादि[illegible]त्यभि[illegible]प्रायः ॥४२॥ परात्परात्मनो हैवं युक्त्या
संभावितैकता ॥ तत्त्वमस्यादिवाक्यैः सा भागत्यागेन लक्ष्यते ॥४३॥
इतावता ग्रंथसंदर्भेण सफलस्य तत्त्वज्ञानस्य निरूपितत्वादुत्त
रग्रंथभागस्यानादंभवसंगद्रत्याकांक्ष्य ॥ तदादंभसिध्धये
वृत्तानुकीर्तनपूर्वकमुत्तरग्रंथस्य तात्पर्यमाह ॥ परापरेति ॥
इवंउक्तेन प्रकारेण परापरात्मनोस्तत्त्वँ पदार्थयोः पर[illegible]मात्म
भीवात्मनोदैकताऽभिन्नतायुक्त्या लक्षणसाम्यवद्दर्शि

67

नाद्युपायेन संभाविता अंगीकारिता साऽकृता तऽत्वमस्यादि
वाक्यैः स्पष्टं भागऽत्यागेन विरुध्धांशापरित्यागेन लक्ष्यते ल
क्षणया वृत्त्या बोध्यते ॥७३॥ जगतो यदुपादानं मायामा
दाय तामसीं ॥ निमित्तं शुध्धसत्वां तामुच्यते ब्रह्म तद्गिरा ॥७४॥
तऽत्वमसीति वाक्यार्थज्ञानस्य तदादिपदार्थज्ञानपूर्वकत्वात्त
ऽपदस्य वाच्यार्थं तावदाह ॥ जगत इति ॥ यः सच्चिदानंदल
क्षणं ब्रह्म तामसीं तमोगुणप्रधानां मायामादाय उपाधि
ऽत्वेन स्वीकृत्य जगतश्चराचरात्मकस्य कार्यवर्गस्य उपादान

मुध्यासाधिष्ठानं शुध्धसत्वां विशुध्धसत्वप्रधानां तामुपाधि-
त्वेन स्वीकृत्य निमित्तमुपादानाय भिन्नं वृर्त्तं भवति ल[illegible] दुड्गुणि-
मित्तोपादानो भयरूपं ब्रह्म तद्गिरा तत्व मसि वाक्यस्थेन तत्पदेनो-
च्यते ॥४॥ यदा मलिनसत्वां तां कामकर्मादिदूषितां
आदत्ते तत्पं इ ब्रह्म त्वंपदेन तदोच्यते ॥५॥ एवं पदद्वीस्याथमा
हा यदेति । तदेवं ब्रह्म यदा यस्यामवस्थायां मलिनसत्वां
दीषइजनस्तमोभिश्रणेन मलिनसत्वप्रधानां अतएव का-
मकर्मादिदूषितां तामविद्यानाह्वाच्यां मायामादत्ते उपाधि-
त्वेन स्वीकरोति तदा त्वंपदेनोच्यते ॥५॥

एवं तत्वंपदार्थावभिधाय वाक्यार्थमाह ॥ त्रितयीमिति ॥ त्रि
त्रितयीमपि त्रिःप्रकारमपि तमःप्रधानविशुध्धसत्वप्रधानं
मलिनसत्वप्रधानत्वभेदेनोक्तामत एव परस्परविरोधिनीं तां
मायां मुक्त्वा परित्यज्य अखंडं भेदरहितं सच्चिदानंदं ब्रह्म मा
हावाक्येन लक्ष्यते इत्यर्थः ॥२७॥

॥ त्रितयीमपि तां मुक्त्वा परस्परविरोधिनीं ॥
॥ अखंडं सच्चिदानंदं माहावाक्येन लक्ष्यते ॥२७॥

सोयमित्यादिवाक्येषु विरोधात्तदिदं तयोः ॥ त्यागेन भागयो

देकआश्रयोलक्ष्यतेयथा॥४७॥नन्वेवंलक्षणावृत्त्यावाक्या
र्थबोधनंक्वचिद्दृष्टमित्याशंक्याह॥सोयमिति॥सोयंदेवद
त्तइत्यादिवाक्येषुतदिदंतयोस्तद्देशैतद्देशकालवैशिष्ट्यलक्ष
णयोर्धर्मयोर्विरोधादैक्यानुपपत्तेर्भागयोर्विरुद्धांश
योस्त्यागेनैकआश्रयोदेवदत्तस्वरूपमेकमेवयथाल
क्ष्यते॥४८॥ मायाविद्येविहायैवमुपाधीपरजीवयोः॥
अखंडंसच्चिदानंदंपरंब्रह्मैवलक्ष्यते॥४९॥एवंदृष्टां
तमभिधायदार्ष्टांतिकमाह॥

मायाविद्येति॥ एवं सोयं देवदत्त इत्यादिवाक्ये यथा तद्वदीश्वरजीवयोरुपाधी उपा
धिभूते मायाविद्ये पूर्वोक्ते विहायाखंडभेदरहितं सच्चिदानंदं परं ब्रह्मैव
महावाक्यैर्लक्ष्यते॥ ४८॥ सविकल्पस्य लक्ष्यत्वे लक्ष्यस्य स्यादवस्तु
ता॥ निर्विकल्पस्य लक्ष्यत्वं न दृष्टं न च संभवि॥ ४९॥ ननु किं महावा
क्येन लक्ष्यं सविकल्पकमुत निर्विकल्पकमिति॥ विकल्पं प्रथमे प
क्षे दोषमाह॥ पूर्ववादी सविकल्पस्येति। सविकल्पस्य विकल्पेन
विपरीतत्वेन कल्पितेन नानात्वादिना रूपेण वर्तत इति सविकल्पं
तस्य लक्ष्यत्वे वाक्येन बोध्यत्वे लक्ष्यस्य वाक्यार्थतया लक्ष्यस्याऽ
वस्तुतास्यान्मिथ्यात्वं स्यात्॥ द्वितीये दोषमाह॥ निर्विकल्पस्येति

निर्विकल्पस्य नामजात्यादिनारहितस्य लक्ष्यत्वं नदृष्टं लो
केन क्कापि दृष्टं न च संभविउपपद्यमानमपि न भवति॥
लक्ष्यलक्षधर्मवतो निर्विकल्प[illegible]त्वव्याघातादिति याव
त्॥४९॥ विकल्पो निर्विकल्पस्य सविकल्पस्य वा भवेत्॥
आद्ये व्याहतिरन्यत्रानवस्थात्माश्रयादयः॥५०॥
सिध्धांती आत्यंतरेत्वाभेदं चोद्यमिति विकल्पपूर्वकं
दोषमाह॥ विकल्प इति। सविकल्पस्य वा निर्विकल्पस्य

नात्युलंघनसदुत्तरं

वालक्ष्यत्वमिति॥ यो विकल्पस्त्वयाकृतः स किं निर्विकल्प
स्य उत सविकल्पस्य भवेति॥ आद्ये प्रथमे पक्षे व्याहति
स्वयोक्तो व्याघातस्य॥ अन्यत्र द्वितीयपक्षेऽनवस्था
दयः। तथाहि सविकल्पस्य विकल्पेनेत्यत्र वि कल्पेन
सह वर्तत इत्यत्र तृतीयांतविकल्पपदेन प्रथमांत
विकल्पपदेन चैक एव विकल्पोऽभिधीयते द्वौ वा एके
यद्व

स्वसस्यापि न स्वासिकत्वं। आत्मा० द्वित्वांतरितस्यापि न सविकल्पकत्वं॥ चक्रकाश्रयः॥

।परस्परस्यापि जन्यसविकल्पकत्वं। अन्यो०

स्वस्थाने स्वस्थानापेक्षा॥ आत्मा०॥ तस्थाने च

तस्थानापेक्षा द्वितस्थाने तस्थानापेक्षा॥ अन्यो० चतुर्थस्थाने प्रथमस्थानापेक्षा प्रथमस्थाने चतुर्थस्थाना
पेक्षा। चक्रको० कुत्रापि पर्यवसानाभावः॥ अनव०

विशेषण~~स्य~~विशेषणमाश्रयो न भवति ॥

एवं चेत्स्वयमेक एव विकल्पाश्रयविशेषणतया आत्माश्रय
स्तदाश्रितो विकल्पश्चेत्तदात्माश्रयता द्वौ चेत्तदा तृतीयांत
नाद्व निर्दिष्टस्यापि विकल्पस्य विकल्परूपत्वात्तदाश्रयस्या
पि स विकल्पत्वात्तद्विशेषणभूतो विकल्पः किंस्वधर्मांतवाद्व
निर्दिष्ट एव विकल्पोऽन्तता न्यामन्यः आद्ये अन्योन्या
श्रयता द्वितीयेपि धर्मिविशेषणीभूतो विकल्पः किंस्वध
र्मांतवाद्व निर्दिष्टमुत तेभ्योऽन्य आद्ये चक्रकापत्तिः द्वि

पं:　　　　　　　　　　　　१　　　　　　　　　　　　दं:

३८ तीयेतस्याप्यन्यस्त[illegible]स्याप्यन्यद्रूपनवस्थापात:॥५०॥
इदं गुणक्रियाजातिद्रव्यसंबधवस्तुषु ॥ समत्तेन स्वरू
पस्य सर्वमेतदितीष्यतां ॥५१॥ न केवलमत्रैवेदं दूषण
मपि तु सर्वत्रैवंविधविकल्पपूर्वकं दूषणं प्रसरतीत्याह॥
इदमिति । इदं विकल्पदूषणं जातं गुणे क्रियाजातिद्रव्यसं
बंधवस्तुषु गुणादिसंबंधा तेषु पंचसु वस्तुषु समंतत
था हि गुणः किं निर्गुणे वर्त्ततेऽथवा गुणवति क्रियापि कि ३८

वा

याऽरहिते वर्त्तते क्रियावर्त्तिँ आद्ये व्याघातोऽन्यत्रात्माश्रयादय
इति सर्वत्रैव मुह्यं ॥ नन्विदमसदुत्तरं चेत्किं सदुत्तरमित्या
शंक्याह ॥ तेनेति ॥ तेनैवं विकल्पस्यासंगतत्वेनैतत्तु गुणा
दिकं सर्वं स्वरूपस्यैतीक्ष्यतां गुणादयः सर्वे वस्तु स्वरूपे
वर्त्तंत इत्यभिप्रायः ॥ ५७ ॥ भवतु एवमन्यत्रैवं कृते कि
मायातमित्यआह ॥ विकल्पेति ॥ विकल्पतदभावाभ्यां
विकल्पेन विकल्पाभावेन चासंस्पृष्टमवस्तु निसं
त

ना

स्पर्वादिद्विस्तेपरमात्मचक्षुनिविकल्पितत्वलक्ष्यत्वसंबधा
धात्तत्रविकल्पितत्वं ~~विकल्पितत्वं~~ नमस्सविकल्पस्यवानि
र्विकल्पस्यवेति। पूर्वोक्तेनविषयीकृतत्वंलक्ष्यत्वंलक्ष
णात्द्याज्ञाप्यत्वंसंबधुः संयोगादिरादिशब्देनद्रव्याद
योग्यत्वंतेतुवाद्वैवधारणेतत्रद्रव्यंनामगुणानामाश्रयो
द्रव्यं। समवायिकारणंद्रव्यमितिवातार्किकैर्लक्षितं।
कर्मव्यतिरिक्तत्वेसतिजातिमात्राश्रयोगुणःनित्यमे

वट॰

78

कमनेकवृत्ति सामान्यमिति लक्षिताजातिः। संयोग
विभा[illegible]गयोरसमवायीकारणजातीयं कर्मेति लक्षिता
क्रिया। एते सर्वे स्वरूपे विकल्पिता एवेत्यर्थः॥५२॥ विक
ल्पतदभावाभ्यामसंस्पृष्टात्मवस्तुनि॥ विकल्पितत्व
लक्ष्यत्वसंबंधाद्यास्तु कल्पिताः॥५२॥ इत्थं वाक्यैस्त
दर्थानुसंधानं श्रवणं भवेत्॥ युक्त्या सं[illegible]भावित[illegible]त्वा
नुसंधानं मननं तु तत्॥५३॥

५०

वे: ५०

एतावताग्रंथसंदर्भेण किमुक्तं भवतीऽयाकांक्षायां फ

ति॥ लितमाहा इऽथाँमि॥ऽर्थं जगतो यदुपादानमिऽयादिग्रं

० थें [illegible] भातीके त्रकारेण वाक्येस्तत्वमस्यादिवाक्ये

स्तादृशानुसंधानं तेषां वाक्यानामर्थस्यजीवब्रह्म

णोरैकऽवलक्षणस्यानुसंधानं श्रवणं भवेयुत्क्या

वेद्या वाद्वस्पर्शादियों इऽयादिनापरापरात्मनोरैक्यं युत्क्या

संभाविते कृतेऽयं तेन ग्रंथसंदर्भेणोक्तवकारऽपासं ०

80

भावितत्वानुसंधानं श्रुतस्यार्थस्योपपद्यमानत्वज्ञानं यदस्ति॥
तत्तु मननमित्युच्यते ॥५३॥ ताभ्यां निर्विचिकित्से
ऽर्थे चेतसः स्थापितस्य यत् ॥ एकतानत्वमेतद्धि निदि
ध्यासनमुच्यते ॥५४॥ इदानीं निदिध्यासनमाह ।
ताभ्यामिति ॥ ताभ्यां श्रवणमननाभ्यां निर्विचिकि
त्से निर्गता विचिकित्सा संशयो यस्मादसौ निर्विचिकि
त्सः तस्मिन्नर्थे विषये स्थापितस्य धारणावतश्चे

तसः। देशासंबधश्चित्तस्य धारणेति पतंजलिनोक्तत्वा
यदेकतानत्वमेकाकारवृत्तिप्रवाहरूपत्वमेतन्निदि
ध्यासनमुच्यते हि प्रसिध्धं योगशास्त्रे तत्रप्रत्येकता
नता ध्यानमिति ॥५४॥ ध्यातृध्याने परित्य
ज्य क्रमाध्येयेकगोचरं ॥ निवातदीपवच्चित्तं स
माधिरभिधीयते ॥५५॥ तस्यैव निदिध्यासनस्य
परिपाकदशा तु समाधिमाह ॥ ध्यातृध्यानेति ॥

निदिध्यासनेतावद्ध्याता ध्यानं ध्येयं चेति त्रितयं
भासते तत्र यदा वित्तमभ्यासवशेन ध्यातृध्याने
ध्याताहं ध्यानं च क्रमात्परित्यज्य ध्येयैकगोचरं
ध्येयमेकमेव गोचरो विषयो यस्य तत्तथाविधं भ
वति तदा समाधिरित्युच्यते। तत्र दृष्टांतः। निवात
दीपवदिति। वायुरहिते देशे वर्तमानो दीपो य
थानिश्चलो भवति तद्वदित्यर्थः॥५५॥

पं:   द:

५२

वृत्तयस्तु तदानीमज्ञाता अप्याऽगोचराः ।। स्मरणा-
दनुमीयंते व्युत्थितस्य समुत्थितात् ।। ५६ ।। वृत्ती-
नामनुवृत्तीस्तु प्रयत्नाऽप्रथमादपि ।। अदृष्टास-
रोदभ्यास संस्कारसविवाद्भवेत् ।। ५७ ।। ननु समा-
धौ वृत्तीनामनुपलब्धौ ध्येयैकगोचरत्वमपि
निश्चेतुं नशक्यत इत्याशंक्य वृत्तिसद्भावस्या-
नुमानगम्यत्वान्नैवमित्याह ।। वृत्तयस्त्विति ।।

५२

84

आत्मगोचरा आत्मागोचरो विषयो यासां ताश्च वृत्तयस्तत्तदा
नीं समाधिकालेऽज्ञाता अपि व्युत्थितस्य समाधेरुत्थि
तस्य समुत्थितादुत्पन्नात्स्मरणादेतावंतं कालं समा
हितोऽभूवमित्येवंरूपादनुमीयंते॥ यद्यत्स्मर्यंते
तत्तदनुभूतमिति व्याप्ते लौकिकसिद्धत्वादित्यर्थः ५६॥
ननु तदानीं वृत्त्युत्पादकप्रयत्नाभावात्कथं वृत्त्यनु
वृत्तिरित्याशंक्य तात्कालिकप्रयत्नाभावेऽपि प्राथमि
कादेव प्रयत्नाददृष्टादिसहकारिसहिताद्भवतीत्याह

85

मा

वृत्तीनामिति। ध्येयैकगोचराणां वृत्तीनामनुवृत्तिस्त्र
प्रवाहरूपेणानुगतिस्तत्र यथैदपिञ्चयऽनात्समाधिपूर्व
कालीनादपिअदृष्टमस्तुकूकू. ह्म क्रमाख्यो यः पुण्य
विशेषः। क्रमाश्चुकुरूपं योगिना त्रिविधमितरेषा
मिति। पतंजलिना सूचितत्वात्। पश्चात्समदभ्यास
संस्कारः पुनः पुनः समाध्यभ्यासेनजनितो भाव
नाख्यः संस्कारविशेषस्ताभ्यां सहकारकारणाभ्यां
सहवर्तमानाद्भवति॥ ५७॥ यथा दीपो निवातस्थो

इत्यादिभिरनेकधा ॥ भगवानिममेवार्थमर्जुनायन्यरू
पयत् ॥५७॥ नन्वयं समाधिः पूर्वाचार्यैर्न निरूपितोदृ
ष्ट इत्याशंक्य सर्वगुरुणा श्रीपुरुषोत्तमेन निरूपितत्वान्नैव
मित्याह ॥ यथेति । यथा दीपो निवातस्थो नेंगते सोपमा
स्मृता इत्यादिभिः श्लोकैरनेकधा नानाप्रकारेण भग
वानूसानैश्वर्यादिसंपन्न इममेव निर्विकल्पसमाधि
रूपमर्थमर्जुनाय सिष्यायन्यरूपयन्निरूपितवान् ॥५८॥

पं॰ द॰

अनादाविह संसारे संचिताः कर्मकोटयः ॥ अनेन वि-
लयं यांति शुद्धो धर्मो विवर्धते ॥१५॥ अस्य समाधेर्
वैतद् फलमाह ॥ अनादाविति ॥ अनादौस्पष्ठ । इहास्मि-
न्संसारे संचितोः संपादिताः कर्मकोटयः कर्मणां पु-
ण्यापुण्यलक्षणानां कोटयः इत्यूपलक्षणं अपरिमितानि
कर्माणि इत्यर्थः ॥ अनेन समाधिना विलयं यांति वि-
नश्यंति ॥ क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे इति



ज्ञानाग्निः सर्वकर्माणि तिस्मृतेऽस्या ॥ शुद्धो धर्मैः ॥
सविज्ञासा विद्यानिवर्तकं तत्त्वसाक्षात्कार साध्य
न्मृतो धर्मो विवर्धते स्य ॥ ५९ ॥ धर्ममेघ मि
मंत्राद्युः समाधिं योगवित्तमाः ॥ वर्षत्येष य
तो धर्मान्मृतधाराः सहस्रशः ॥ ६० ॥ तत्र किं प्र
माणमित्यत आह ॥ धर्मेति ॥ योगवित्तमाः अ
तिशयेन योगज्ञाः ब्रह्मसा[illegible]क्षात्कारवंत इति
यावत् ऋत्यर्थः ॥ इमं निर्विकल्पसमाधिं धर्ममेघं ॥

ओ दुःस्वच्छं । तदुपपादयति ॥ वर्षतीति । यत: कारणा
देवं समाधिः धर्मामृतधाराः धर्मलक्षणा
अंम्रतधारा सहस्रैव वर्षति ॥ क्षणमेकं क्रतुश
तस्यापि इति श्रुतेः ॥ अतो धर्ममेघं प्राहुरि
ति पूर्वेणान्वयः ॥ ६० ॥ अमुना वासनाजाले
निःशेषं प्रविलापिते ॥ समूलोन्मूलिते पुण्यपा
पाख्ये कर्मसंचये ॥ ६१ ॥ इदानीं समाधेः पर

मत्रयोजननमाहा।अमुनेति।अमुनासमाधि।।
नावासनाभ्यासेअहंकारममकारकर्तृत्वाद्य
भिमानहेतुभूतेस्थानविरुद्धेसंस्कारसमू
हेनिःशेषंयथाभवतितथाप्रविलापितेविना
शितेपुण्यपापाख्येकर्मसंचयेसमूलोन्मूलिते।।
मूलसहितंयथाभवतितथोन्मूलितेइष्टेविना
शितेइतियावत्।।६१।।फलितमाह।वाक्यमिति।।

पं: द:

मृ वाक्यं तत्त्वमस्यादिवाक्यं अप्रतिबध्यं सत् कर्म।।
वासनाभ्यां प्रतिबंधः इतं सत् आकू परोक्षा।।
वभासिते पूर्वं परोक्ष तयाअकानित्ते तत्त्वे करा
मलकवत्स्फुटे स्थिता मलकगोचरं भिन्नापरोक्षम
परोक्षतया तत्त्वावभासनसमर्थं बोधं ज्ञानं
अनूयते ज न यति।। ६२ ।। वाक्यमप्रतिबध्यंस ।।
ते ऽआकू परोक्षावभासिते।। करामलकवद्बोधमप
रोक्षं प्रसूयते।। ६२ ।।
मृ

92

परोक्षंब्रह्मविज्ञानंशाब्दंदेशिकपूर्वकं।बुद्धिपूर्वंकृतं॥
पापंकृत्स्नंदहतिवह्निवत्॥६२॥इदानींपरोक्षज्ञा
नस्यफलमाह।परोक्षमिति।देशिकपूर्वकंगुरु
मुखाल्लब्धंशाब्दंतत्वमस्याद्यागमजन्यंपरो
क्षंब्रह्मविज्ञानंबुद्धिपूर्वकंज्ञानैर्भवंतियेधातथा
कृतंकृत्स्नंपापंवह्निवद्दहति॥६३॥अपरोक्षज्ञान
फलमाह॥

पूर्वं

93

अपरोक्षेति ॥ शाद्वं देशिकपूर्वकं व्याख्यातं । अपरोक्षात्मवि-
ज्ञानमपरोक्षस्यात्मनो विज्ञानं संशयविपर्ययरहितम्
यत्तु ज्ञानं तत्संसारकारणाज्ञानतमसः संसारकारणं ॥
यदज्ञानमस्ति तदेव तमस्तस्य चंडभास्करः मध्याह्नका-
लीनः सूर्यः बाह्यतमसश्चंडभास्कर इवाज्ञानतमसो
निवर्तकमित्यर्थः ॥६४॥ अपरोक्षात्मविज्ञानं शाद्वं
देशिकपूर्वकं ॥ संसारकारणाज्ञानतमसश्चंडभास्करः ॥६५॥

इत्थं तत्त्वविवेकं विधाय विधिवन्मनः समाधाय॥ विगलितसंसृतिबंधः प्राप्नोति परं पदं नरो न चिरात्॥६५॥
इति तत्त्वविवेकः समाप्तः संपूर्णमस्तु॥ ग्रंथाभ्यासफलमाह। नर इत्थमुक्तेन प्रकारेण तत्त्वविवेकं तत्त्वस्य ब्रत्ना[illegible] इत्थमिति॥
इमं केवलक्षणस्य विवेकः कोसौ पंचकादिवेचनं विधाय कृ[illegible]त्वा तत्त्विंसत्त्वे विधिवच्छास्त्रोक्तप्रकारेण मनः समाधाय स्थिरीकृत्य विगलितसंसृतिबंधो॥

प० (नं. ७०१) ८

॥ अपरोक्षज्ञानेन निवृत्तसंसारबंधः सनुपरंपदं नि
रतिशयानंदरूपं मोक्षं नचिरादविलंबेन प्राप्नोति स
त्यज्ञानानंदलक्षणं ब्रह्मैव भवतीत्यर्थः ॥६५॥ इ
ति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थ
विद्यारण्य मुनिवर्यकिंकरेण श्रीरामकृष्णाख्य
विदुषा विरचिंता तत्त्वविवेकदीपिका समाप्ता ॥ छ छ
छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ श्रीहुमार्पणमस्तु ॥ छ ॥
२४५७

KKSU LIBRARY
RAMTEK
441 106
M-1599
Dist. Nagpur

```
[OrderDescription]
,CREATED=28.08.20 14:08
,TRANSFERRED=2020/08/28 at 15:50:21
,PAGES=96
,TYPE=STD
,NAME=S0003563
,Book Name=M-1599-PANCHDASHI STIK
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
```

```
FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
```

```
FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
```

```
FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,
```